International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 149-156
© 2018 IJSR
www.anantaajournal.com
Received: 15-09-2018
Accepted: 20-10-2018

**विश्वजित् वर्मन**
शोधच्छात्रः, राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, साहित्यविभाग,
आन्ध्रप्रदेश, भारत

**Correspondence**
**विश्वजित् वर्मन**
शोधच्छात्रः, राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, साहित्यविभाग,
आन्ध्रप्रदेश, भारत

# कालिदासनाटकेषु दार्शनिकतत्त्वानि

## विश्वजित् वर्मन

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते॥ [i]

इति भरतमुनिप्रणीतस्य नाट्यशास्त्रवचनानुसारं नाटकं ज्ञानशिल्पकलाविद्यायोगकर्मादि सकलज्ञानराशेः समन्वितं रूपमिति सिध्यति। ज्ञानशब्देनात्र आत्मतत्त्वमपि वुध्यते। भारतीयविद्वांसः आत्मतत्त्वान्वेषणाय मोक्षप्राप्तये च सदा तत्पराः इति विदितचरमेव। विषयेऽस्मिन् कवयः न व्यतिरेकाः। तथा चोक्तं काव्यालङ्कारकारेण भामहेन –

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥ [ii]

काव्यं धर्मादिपुरुषार्थचतुष्टयसाधनस्य तत्त्वशास्त्रसमन्वितदर्शनशास्त्रमिवोत्कृष्टो मार्गः भवति। तादृक्षदार्शनिकतत्त्वैः परिपूर्णोऽयं साहित्यशास्त्रं नृणां मोक्षप्राप्तये नितरामुपकरोति। साहित्यशास्त्रस्य दृश्यश्रव्यकाव्यभेदाभ्यां दृश्यकाव्यान्तर्गतनाटकमानन्दप्रदायकं भवति। तत् च आनन्दमार्गेण परमालौकिकमानन्दमनुभावयति। अतः नाट्यकर्तारः स्वीयनाट्यरचनाकौशलेन मनुष्यजीवनोपयोगी दार्शनिकतत्त्वानां विनिवेशनमवश्यं कुर्वन्त्येव। कवितल्लजः महाकविकालिदासः तत्त्वविनिवेशनवर्त्मनि धुरीणः इति नास्ति संशयलेशोऽपि। तेन विरचितनाटकेषु दार्शनिकतत्त्वानामाभासः वहुत्र दरीदृश्यन्ते। महाकविकालिदासः यथा कोमलकान्तपदावलीरचनायां सुनिपुणः सुकवि तथैव दार्शनिकगुढतत्त्वानां समावेशे क्रान्तदर्शी मनिषी। स्वीयनाटकेषु यथावसरं दार्शनिकतत्त्वानां समावेशनं कृतवान्।

अत एतदाधारेणैव कालिदासनाटकेषु दार्शनिकतत्त्वान्वेषणाय पत्रमिदं मया प्रस्तूयते।

भारतीयदर्शनपरम्परायां वेदस्य प्रामाण्यमताप्रामाण्यतां विचार्यः भेदद्वयं वर्तते। तत्र ये वेदप्रमाण्यताम् अङ्गीकुर्वन्ति ते आस्तिकाः, ये नाङ्गीकुर्वन्ति ते नास्तिकाः इति। आस्तिकदर्शनं सांख्यः, योगः, न्यायः, मीमांसा, वैशेषिकः, वेदान्तश्चेति षट्-प्रकारकाः। पुनः नास्तिकाः- चार्वाक्, जैनः, वौद्धश्चेति त्रिप्रकारकाः। सर्वेषु दर्शनेषु दार्शनिकमौलिकतत्त्वानि सूक्ष्मतया आलोचितमस्ति। प्रायः दार्शनिकदृष्ट्या जागतिकतत्त्वान्वेषणाय, शाश्वतसत्यान्वेषणाय, ऐश्वरिकतत्त्वान्वेषणाय च भारतीयदर्शनस्य सर्वे सम्प्रदायाः एकत्रैव समागतास्सन्ति। तत्र-

1. सृष्टितत्त्वम्
2. जगत्करणम्
3. मोक्षस्वरुपः
4. ज्ञानमीमांसा
5. तत्त्वमीमांसा
6. कर्ममीमांसा
7. आचारतत्त्वम्

इत्यादयाः अंशाः प्रमुखतया विचारितम् अस्ति। एतानि दर्शनस्य मूलभूततत्त्वानि मनसि निधाय कालिदासविरचितनाटकेषु दार्शनिकतत्त्वान्वेषणाय अग्रे प्रसार्य्यते। तत्र आदौ-

**सृष्टितत्त्वम्-**

भारतीयदर्शनेषु सृष्टितत्त्वं वहुविस्तृतविवेचितमस्ति। साहित्यशास्त्रेऽपि महाकविकालिदासः विषयेऽस्मिन् ईषदालोचितवान्। इयं सृष्टिः कथं जातम् ? सृष्टिकर्ता आदौ कं विषयं सृष्टवान्? ततः कस्मात् कस्य सृष्टिः जातः? प्रलयकाले च चराचरमिदं कथं विनष्टम्? इत्यादि विबिधप्रश्नाः समायान्ति। कालिदासनाटकेषु एतेषां सर्वेषां प्रश्नानां समाधानमस्माभिः प्राप्तुं शक्यते। तत्र सृष्टिरहस्यविषये विक्रमोर्वशीयनाटकस्य मङ्गलाचरणे एव ज्ञायते यत्, कविरयं अद्वैतवेदान्तानुसारं जगत्कारणम् 'अद्वैतं ब्रह्म' इति वदति। तद्यथा-

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
सः स्थाणुः स्थिर-भक्ति-योग-सुलभो निःश्रेयसायाऽस्तुवः॥ [iii]

महाकविकालिदासानुसारं परब्रह्मणः एव दृश्यमानजगतः कारणमिति। परब्रह्मणः एव इच्छानुसारं सृष्टिं सम्पादयति। एवं स्थावरजङ्गमात्मकसमस्तानां जीवानां लालनं- पालनं- पोषणं च करोति। एवञ्च अन्ते तेषां विनाशमपि सम्पादयति। सृष्टिकाले सैव अद्वैतपरमेश्वरः ब्रह्म इति । पोषणात् सैव विष्णुनाम्ना लोकविख्यातम् एवं संहारे सैव महेशरूपेण प्रसिद्धः। सत्त्वादिगुणापेतपरमात्मनः उत्पत्ति-स्थिति-लयरूप कार्यकारणात् क्रमशः ब्रह्मा, विष्णुः, महेशः इति त्रिभिः नामभिः प्रसिद्धः वर्तते। अभिज्ञानशाकुन्तलनाटके नान्दीपाठे भगवतः शिवस्य अष्टमूर्तेः वर्णना प्रसङ्गे सृष्टेराद्यसृष्टिः जलमिति उक्तम्-

या सृष्टिः स्त्रष्टुराद्या वहति विधिहूतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥ [iv]

अत्र ज्ञायते यत् प्राथम्येन जलमिति तत्त्वस्य रचनम् अभूत्। तस्य इदं सृष्टिप्रक्रियावर्णनं श्रुतिसम्मतमेव। शुक्लयजुर्वेदस्य मनुमत्सकथापि इदं वाक्यमेव समर्थयति। तथा च मनुसंहितायाम् अप् एव ससर्जादौ इत्यादि वाक्येन सृष्टेरादिमसृष्टिः जलमिति ज्ञायते।

कालिदासस्य इयं भावना वर्तते यत् परमेश्वरः ब्रह्माणम् उत्पादितवान्। एतेन स्पष्टं भवति यत् सः सृष्टिविधानं परमेश्वरप्रसूतमिति मन्यते, न तद्भिन्नम्। एतदर्थं कालिदासः ब्रह्मरूपपरमेश्वरस्य स्तुतिं कुर्वन् उक्तवान् हे प्रजापते ! त्वं पितृणामपि पिता असि, देवानामपि देव असि, परमपुरुषादपि भिन्न असि जगत्कारणं त्वमेव असि। तद्यथा-

त्वं पितृमामपि पिता देवानामपि देवता।
परतोऽपि परश्चाऽसि विधाता वेधसामपि॥ [v]

**जगत्करणम्**

प्रायः सर्वेषु भारतीयदर्शनेषु एवं विचारमन्थनं कृतमस्ति यत् इयं सृष्टेः कारणं किमिति। किं तत् तत्त्वं येन चराचरमिदं सृष्टिमप्राप्नोत्। न्यायवैशेषिकदर्शनयोः जगतः सृष्टेः पृथिवी-जल-तेज-वाय्वादि परमाणवः उपादानकारणम्, तथा ईश्वरः निमित्तकारणम् इति।

सांख्ययोगदर्शनयोः प्रकृतिः जगतः च उपादानकारणम्। तथा प्रकृतिपुरुषयोः संयोगादेव चराचरमिदं सृष्टम्। एतदेव निमित्तकारणम् इति।

पूर्वमीमांसायां तु जगतः मूलभूतकारणं परमाण्वेव (परमाणुकारणवाद) मीमांसायां तु परमाणु तथा जीवानां शुभाशुभकर्मफलयोः एव सृष्टेः कारणमिति।

अद्वैतवेदान्तेऽपि अनिर्वचनीय ब्रह्मतत्त्वमेव जगतः कारणम्। एतदेव जगतः अभिन्ननिमित्तोपादानकारणम् इति। एवमेव सृष्ट्युत्पत्तिविषये भारतीयदर्शनेषु यद्यपि मतभेदाः वर्तन्ते तथापि स्वविचारबलेन सर्वाण्यपि मतानि कालिदासेन स्वीकृतानि।

महाकविकालिदासः स्वीयनाटकेषु परमेश्वरस्य स्तुतिमाध्यमेन तथा परमेश्वरस्य गुणवर्णनेन जगत्कारणविषयकचिन्तां प्रकटितवान्। अस्मिन् प्रसङ्गे स वेदान्तदर्शनानुसारी। स्वीयदार्शनिकदृष्ट्या जगतः कारणं परब्रह्म एव, तच्च सृष्टेः अभिन्ननिमित्तोपादानरुपकारणम् इति। इदमेव प्रमाणयितुं विक्रमोर्वशीयनाटकस्य नान्दीश्लोके वदति यत्—

वेदान्तेषु यमाहुरेकपुरुषं व्यप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
सः स्थाणुः स्थिर-भक्ति-योग-सुलभो निःश्रेयसायाऽस्तुवः॥ [vi]

अत्र इश्वर नाम परब्रह्मैव। मुमुक्षुजनाः यं मनसि निधाय तपस्यारताः भवन्ति। सैव जगतः सृष्टेः कारणम्।

एवमेव मालविकाग्निमित्रनाटकस्य मङ्गलपद्येऽपि परमैश्वर्यवान् परमेश्वरः एव जगतः सृष्टेः कारणमिति कथितवान्। तद्यथा—

एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासम्मिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद्यतीनाम्।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनूभिर्विभ्रतो नाभिमानः
सन्मार्गलोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः॥ [vii]

एवं स्वीय रचनासु ब्रह्मणः विष्णोः तथा शिवस्य स्तुतिप्रसङ्गे परमेश्वरस्य कृते अजः, अनादि, अनन्तः, अव्यक्तादि विशेषणपदानां प्रयोगं कृतवान्। कालिदासरचनासु आधिक्येन शिवस्यैव स्तुतिः दृश्यते अतः शैवदर्शनसमर्थकोऽयं कवि अभिज्ञानशाकुन्तले भगवतः शिवस्याष्टमूर्तेः वर्णनप्रसङ्गे सृष्टेरादि सृष्टिः जलमिति उक्तवान्। तद्यथा-

या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्याक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥ [viii]

किन्तु इयं सृष्टेरपि कश्चन सृष्टिकर्ता अवश्यं भवत्येव सैव परमात्मपरमेश्वर जगतः कारणभूतः इति।

**मोक्षस्वरूपः**

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि** [ix] – इति वचनेन ज्ञायते यद् अत्र सुकुमारमतिनामपि चतुर्वर्गफलप्राप्तिः भवति। चतुर्वर्गेषु मोक्षः परमपुरुषार्थः। उपनिषदि मोक्ष नाम सांसारिकबन्धनात् मुक्तिः इति प्रतिपादितम्। महाकविकालिदासेनापि सांसारिकवास्तवतां सम्यक् विविच्य सुकुमारमतिसहृदयान् सरसमार्गेण जन्मजरामरणादिसांसारिकबन्धनात् मुक्तिं प्रदातुं नाटकानि रचितानि। तेन मोक्षैव मानवजीवनस्य परं लक्ष्यम् इति प्रतिस्थापितम्।

वेदेषु शोकमोहादिनिवृत्तिरुप आनन्दमयब्रह्मणः अपरोक्षानुभूति हि ब्रह्म इति। तद्यथा-

विज्ञानमानन्दं ब्रह्म - बृहदारण्यकोपनिषद् 3.1.8

सत्यं ज्ञानमनन्तं ब्रह्म - तैत्तिरीययोपनिषद्- -2.1.1

तरति शोकमात्मवित् – छान्दोग्योपनिषद् 1.1.3

महाकविकालिदासेनापि मोक्षः नाम तत्त्वसाक्षात्कारः। तथा चायं योगाभ्यासादिसाधनसुलभ न, केवलं भक्तियोगेनैव प्राप्तुं शक्यते। तद्यथा विक्रमोर्वशीयनाटकस्य मङ्गलाचरणे—

वेदान्तेषु यमाहुरेकपुरुषं व्यप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
सः स्थाणुः स्थिर-भक्ति-योग-सुलभो निःश्रेयसायाऽस्तुवः॥

वस्तुतः मोक्षः नाम ब्रह्मतत्त्वेन सह जीवस्य अद्वयभावः स्वस्वरुपावबोधः। कालिदासानुसारं मोक्ष नाम 'ब्रह्मभूयं गतिम्' इति। तदेव अभिज्ञानशाकुन्तलनाटके भरतवाक्ये वदति यत्-

ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः॥ [x]

**ज्ञानमीमांसा**

जन्मजरामरणादित्रिविधक्लेशेभ्यः अत्यान्तिकमुक्तिः एव भारतीयदर्शनस्य मूलसिद्धान्तः। इयं मुक्तिः शुद्धात्मतत्त्वज्ञानं विना नैव शक्यते। अतः सर्वेषु भारतीयदर्शनेषु ज्ञानस्य महत्त्वं विषये आलोचितमस्ति। महाकविकालिदासः यद्यपि अस्मिन् विषये साक्षात्किमपि न वदति किन्तु तेन विरचितनाटकानामवलोकनेन शुद्धात्मतत्त्वज्ञानं स्पष्टं भवति। किं नाम ज्ञानमिति जिज्ञासायां दर्शनेषु उक्तमस्ति यत् –

सर्वव्यावहारहेतुर्गुण बुद्धिर्ज्ञानं, सा द्विविधा- स्मृतिरनुभवश्चेति। तत्र संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स द्विविधः- यथार्थोऽयथार्थश्चेति। तद्वति तत्प्रकारकोऽनुभव यथार्थः, तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः[xi] इति।

तथा यथार्यज्ञानं येन साधनेन उत्पद्यते तदेव प्रमाणमित्युच्यते। (प्रमाकरणं प्रमाणम्) प्रमाणविषयेऽपि भारतीयदार्शनिकेषु मतभेद् विद्यन्ते। तत्र-

चार्वाकाः केवलं प्रत्यक्षमेकमेव प्रमाणमिति स्वीकुर्वन्ति।

वैशेषिकाः तथा वौद्धाः प्रत्यक्षमनुमानञ्च द्विविधं प्रमाणमङ्गीकुर्वन्ति।

सांख्यसाम्प्रदायिनः प्रत्यक्षामनुमानागमश्चेति त्रिविधं प्रमाणमङ्गीकुर्वन्ति।

नैयायिकाः प्रत्यक्षमनुमानागमोपमानञ्च प्रमाणचतुष्टयं स्वीकुर्वन्ति।

प्रभाकममीमांसकाः प्रत्यक्षमनुमानागमोपमानमर्थापत्तिश्चेति पञ्चविधं प्रमाणं स्वीकुर्वन्ति।

कुमारिलभट्टः प्रत्यक्षमनुमानागमोपमानार्थापत्तिरभावश्चेति षड्विधं प्रमाणं स्वीकुर्वन्ति।

पौराणिकाः एतैस्सह ऐतिह्यं, सम्भावना च अष्टविधं प्रमाणम् अङ्गगीकुर्वन्ति।

यद्यपि महाकविकालिदासः प्रत्यक्षरूपेण प्रमाणविषये किमपि न वदति तथापि परोक्षरूपेण प्रमाणविषये वहून् चर्चान् कृतवान्। तद्यथा अभिज्ञानशाकुन्तलस्य प्रथमे अङ्के सन्देहपदेषु वस्तुषु सज्जनानामन्तकरणमेव प्रमाणमिति –

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तकरणप्रवृत्तयः। [xii]

यस्मिन् विषये सम्यग् ज्ञानप्राप्तिः प्रत्यक्षप्रमाणेन न सिद्धति तस्मिन् विषये सन्त-महापुरुषाणामन्तकरणमेव प्रमाणमिति।

एवं प्रत्यक्ष प्रमाणविषयेऽपि विक्रमोर्वशीयनाटकस्य चतुर्थाङ्के उर्वशीवचनेन यथा –

अभ्यन्तर-करणया मया प्रत्यक्षीकृत-वृत्तान्ताः खलु महाराजः। [xiii]

एवं मालविकाग्निमित्र नाटकेऽपि अन्तकरणप्रवृत्तिरेव प्रमाणम् इति मिलति। -

अपि क्वचिदुपेयोपायदर्शने व्यापृतं ते प्रज्ञाचक्षुः।[xiv]

एवं विक्रमोर्वशीये तथा मालविकाग्निमित्रनाटकं अनुमानप्रमाणं स्वीकुर्वानोऽयं **तर्कः** शब्दस्य प्रयोगं कृतवान्

राजा-नास्त्यगनिर्मनोरथानाम्। (गृहीत्वाऽनुवाच्य च सहर्षम्) संखे! प्रसन्नस्ते तर्कः। [xv]
अभिज्ञानशाकुन्तलनाटके अनुमानप्रमाणस्य दृष्टान्तोऽपि दृश्यते तद्यथा-

तव सुचरितमङ्गुलीयकं नूनं प्रतनु ममेव विभाव्यते फलेन।
अरुणनखमनोहरासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु॥ [xvi]

शेषवत् अनुमानं यत्र कार्यं दृष्ट्वा कारणमनुमीयते। अत्र राज्ञवचनेन आङ्गुलीयकं दृष्ट्वा पुण्यकल्पनं शेषवत् अनुमानस्योदाहरणम्। मालविकाग्निमित्रनाटके तृतीयाङ्के शब्दप्रमाणस्यापि दृष्टान्तं परिलक्ष्यते तद्यथा-

बकुलाबालिका – अनुरागोऽनुरागेण परीक्षितव्य इति सुजनवचनं प्रमणीकुरु। [xvii]

एतावता ज्ञायते यत् कालिदासेन प्रमाणविषये वहूनि उदाहरणानि दत्तानि। तस्य नाटकानुशीलनेन ज्ञायते यत् ज्ञानोत्पादकदार्शनिकतत्त्वानां समावेशः अवश्यं कृतवान्। अन्येषु प्रमाणेषु श्रुतिप्रामाण्यं एव वलवत्तरमिति तेनोद्घोषितम्। महाकविना मालविकाग्निमित्रनाटके तृतीयाङ्के अनुमानप्रमाणं नाङ्गीकृतवान् पुनः रघुवंशमहाकाव्ये अनुमानस्य प्रामाण्यता स्वीकृतवान्। एतेव ज्ञायते यत् अनुमानमपि यदि श्रुत्यानुकूल भवति तर्हि तस्य प्रामाण्यता अवश्यं स्वीकरणीयम् इति।

**तत्त्वमीमांसा**

महाकविना स्पष्टं प्रतिपादयति यत् परमतत्त्व एकैव यं वयं ब्रह्म आत्मा वेति जानीमः तन्मतानुसारं परमतत्त्व अजः, शाश्वतः, विभुः, परमज्योतिस्वरूप इति। स्वीयरचनासु इदम् अद्वयपरमतत्त्वं परमात्मास्वरूपं स्तुतिरूपेण वर्णनं कृतवान्। ज्ञातव्यमस्ति यत् कालिदासरचनासु यत् परमतत्त्वम् आलोचित तत् ब्रह्मा, विष्णु, शिवातिरिक्त सर्वाधिष्ठाता परमदेवता। अयं देवतारुप-उपनिषत्पुरुषः येन समस्तचराचरमिदं द्युलोक-पृथ्वीलोकं च व्याप्तं कृत्वा तिष्ठति। तद्यथा विक्रमोर्वशीये–

वेदान्तेषु यमाहुरेकपुरुषं व्यप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।

**कर्ममीमांसा**

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ xviii

इति श्रीमद्भगवद्गीतायां व्यासदेवोक्तवचनानुसारं ज्ञायते यत् मनुष्यः सर्वदा किमपि कार्यं कुर्वन्त्येव। किमर्थं चेत् मनुष्यः प्रकृतिजन्यगुणैः परवशभूत्वा सर्वदा कर्मे प्रवृत्तः भवन्ति। एतद् कारणात् भारतीयदर्शनस्य सर्वस्मिन्नपि विभागे कर्मतत्त्वालोचनम् अवश्यं कृतमस्ति। सर्वषां मतमिदमस्ति यत् मनुष्यः स्वीयकृतकर्मफलस्य भोक्तारः अवश्यं भवन्त्येव। सामान्यतः कर्म द्विप्रकारकः शुभकर्म अशुभकर्म च। अस्यैव पापकर्म-पुण्यकर्म चेति नामान्तरम्। कालिदासस्य नाटकेषु एतयोः द्विप्रकारककर्मणोः उल्लेख अस्माभिः प्राप्तुं शक्यते। अभिज्ञानशकुन्तलनाटकस्य द्वितीयाङ्के महाकविनां दृष्टान्तरुपेण वदति यत् –

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रुपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥ xix

शकुन्तला अखण्डपुण्याना फलमिव, यां पुण्यफलं विना प्राप्तुं न शक्यते । तथा च अस्यैव षष्ठे अङ्के धीवरेण प्राप्तः अङ्गुलीयकं दृष्ट्वा दुष्यन्तः वदति यत् –

तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोहरासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु॥

अङ्गुलीयकं तवापि पुण्यं मादृशः अल्पमेव तव कर्मफलेनैव एवं ज्ञायते। यतोहि शकुन्तलायाः नवपल्लव इव अरुणायित करकिशलयात् त्वं भ्रष्टोऽसि।

मनुष्यः प्रारब्धकर्मणः फलम् अवश्यं प्राप्नुवन्त्येव। अत एव कालिदासः स्वीयनाटकेषु प्रारब्धकर्मनिमित्तं भाग्यः, विधिः, भवितव्यता, दैव इत्यादि पदानां प्रयोगं कृतवान्। तद्यथा-

क. भवितव्यानां द्वाराणि भवन्ति सर्वत्र। xx

ख. भवितव्यता खलु बलवती। xxi

ग. नास्ति विधेरलङ्घनीयम्। xxii

घ. दैवमस्या प्रतिकूलं शमयितुं सोमतीर्थं गतः। xxiii

एतावता ज्ञायते यत् भारतीयदर्शनशास्त्राणुसारं कर्मसिद्धान्तं सम्यग्विचार्यः महाकविकालिदासः अनासक्ततया कर्मणि प्रवर्तनाय सर्वदा उद्बोधितवान्। एवमेव कर्मफलप्राप्तेः सिद्धान्तमपि प्रतिष्ठापितवान्।

**आचारतत्त्वम्**

आङ् उपसर्गपूर्वकात् चर् धातोः भावे घञ् प्रत्यये आचारशब्दस्य निष्पत्तिः। अस्यार्थः व्यवहारः आचरणं वा। आचार-व्यवहारयोः सम्बन्धः मनुष्याणां व्यवहारिकजीवनादर्शयोरुपरि आधारितमस्ति। नैतिकसाधनां विना चित्तशुद्धता तथा आध्यात्मिकमुन्नतिं साधयितुं न शक्नोति। तथैव कठोपनिषदि-

नाविरतो दुश्चरितान्नाशान्तो नासामाहितः।
नाशान्तामनसो वापि प्रज्ञानेनैनमाप्नुयात्॥ xxiv

भारतीय-आचारशास्त्रेऽपि मनुष्याणाम् इहलोकिक-पारलौकिकोन्नतिसाधनाय बहवः नियमाः निर्धारिताः सन्ति। शास्त्रनिर्धारितनियमानुसारं तान् नियमान् आचरणेन मानवाः जन्मजन्मान्तरबन्धनात् मुक्तिं प्राप्नुवन्ति। शास्त्रविरुद्धाचारणं तु समाजे निन्दनीय भवति तथा चाभीष्टफलप्राप्तये वाधामुत्पादयति। तथैव अभिज्ञानशाकुन्तलनाटके दुष्यन्त-शकुन्तलयोः गान्धर्वविधिना स्वेच्छाविवाहः शास्त्रविरुद्धमासीत्। तदेव अनार्यकार्यमिति तद्यथा अनसूयावचनेन-

यद्यपि नाम विषयपराङ्मुखस्य अपि जनस्यैतन्न वादितं तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्। [xxv]

अस्य शास्त्रविरुद्धमनार्याचरणस्य दुष्परिणामः अत्यन्तकष्टकरमासीत् तत् पञ्चमे षष्ठे च अङ्के शकुन्तला, दुष्यन्तः उभौ अनुभूतौ।

अहिंसाचारणम्- कालिदासानुसारं अहिंसा परमो धर्मः। तदर्थं स्वीयनाटकेषु यथावसर हिंसाविधेः निषेधः तथा अहिंसावृत्तेः प्ररोचनां कृतवान्। अभिज्ञानशाकुन्तले मृगानुसारी राजादुष्यन्तं वैखानसमुखेन आश्रममृगबधात् निवारयति-

वैखानसः- राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।
न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तुलाराशाविवाग्निः।
क्व वत हरिणकाणां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते॥ [xxvi]

**ब्रह्मचर्यधर्मः**

ब्रह्माचर्याश्रमे नियमपूर्वक इन्द्रियनिग्रहः मनुष्याणाम् अनिवार्यं धर्ममासीत्। किमर्थं चेत् इन्द्रियनिग्रहं विना न तु विद्याभ्यासः न वा आत्मज्ञानप्राप्तिः। इदमेव वाक्यं प्रमाणयितुम् अभिज्ञानशाकुन्तलनाटकस्य सप्तमाङ्के महाराजवचनेन ब्रह्मचर्यविधं प्रतिपादयति। यथा-

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
ध्यानां रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तत्मिंस्तपस्यन्त्यमी॥ [xxvii]

तस्य मतानुसारं विद्याभ्यासकाले यः वर्णाश्रमव्यावस्थानुसारं विद्याभ्यासं करोति स जन्मजन्मान्तरसांसारिकबन्धनात् मुक्तिं प्राप्नोति।

एवमेव महाकविकालिदासः श्रद्धा, क्षमा, दया, परोपकारः, विनयः, अतिथिसत्कारः, निरभिमानिता इत्यादि विविधवैयक्तिकसदाचाराणां पालनाय उदाहरणमाध्यमेन जनान् सर्वदा प्रोत्साहितवान्।

उपर्युक्तविवेचनात् स्पष्टं वक्तुं शक्यते यत् कविकुलगुरुकालिदासस्य प्रसिद्धिः यद्यपि एकोत्कृष्टकविशक्तिसम्पन्नमहाकवित्वेन परिदृश्यते किन्तु दर्शनशास्त्रवत् शास्त्रीयविषयस्य प्रणेतारूपेण तथा नास्ति। किन्तु तस्य काव्यकृतिभिः सह भारतीयदर्शनस्य विभिन्नसिद्धान्तान् समर्थ्य तेषामुपरि सूक्ष्मज्ञानस्य परिचयं प्रदत्तवान्। सृष्टितत्त्वम्, जगत्करणम्, मोक्षस्वरुपः, ज्ञानमीमांसा, तत्त्वमीमांसा, कर्ममीमांसा, आचारतत्त्वम् इत्यादिदार्शनिकसिद्धान्तान् समुपवर्णयन् वेदान्तदर्शनस्य सैद्धान्तिकविचारान् समर्थितवान्। एतेन स्पष्टं भवति यत् महाकविकालिदासः भारतीयदर्शनस्य समस्तप्रस्थानैः आमूलं परिचितः आसीत्। इति शम्।

**परिशीलितग्रन्था**


1. अभिज्ञानशाकुन्तलम्, कालिदासः, चक्रवर्ती सत्यनारायण, संस्कृत पुस्तक भाण्डार, कोलकाता, 2008।
2. विक्रमोर्वशीयम्, कालिदासः, पाण्डेय परमेशवरदीन, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2016।
3. मलविकाग्निमित्रम्, कालिदासः, पि.शङ्कर पण्डित, गभरमेन्ट सेन्ट्रल बुक् डिपार्टमेन्ट, वम्बाई, 1869।
4. तर्कसंग्रहदीपिकासर्वस्वम्, आचार्य सन्निधानं सुदर्शनशर्मा, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः, 2012।
5. साहित्यदर्पणम्, हरेकान्तमिश्रः, चौखम्भा ओरियन्टालिया, दिल्ली, 2017।
6. नाट्यशास्त्रम्, चतुर्वेदी ब्रजमोहन, विद्यानिधि प्रकाशन, दिल्ली, 2014।
7. संस्कृत नाटकों में दार्शनिक तत्त्व, विद्यालङ्कार शशिभानु, संजय प्रकाशन, दिल्ली, 2001।
8. ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर, 2010।

9. भारतीयदर्शनेर रुपरेखा, गोस्वामी सीताराम, संस्कृत बुक् डिपो, कोलकात्ता, 2013।
10. मनुस्तृति, डॉ. मानवेन्दु वन्दोपाध्याय, सदेश, कोलकाता, 2010।
11. Kālidasā Radhakrishnan S. New Bharatiya Book Corporation, Delhi, 2005.

---

[i] नाट्यशास्त्रम् – 1.116

[ii] काव्यालङ्कारः- 1.2

[iii] विक्रमोर्वशीयम्- 1.1

[iv] अभिज्ञानशाकुन्तलम्- 1.1

[v] कुमारसम्भवम्-2.14

[vi] विक्रमोर्वशीयम्-1.1

[vii] मालविकाग्निमित्रम्- 1.1

[viii] अभिज्ञानशाकुन्तलम् - 1.1

[ix] साहित्यदर्पणम् – 1.2

[x] अभिज्ञानशाकुन्तलम् – 7.35

[xi] तर्कसंग्रहः- पृ-69

[xii] अभिज्ञानशाकुन्तलम् -1.20

[xiii] विक्रमोर्वशीयम् - 4. पृ- 211

[xiv] माल- प्रथमोऽङ्कः

[xv] विक्रमोर्वशीयम् – द्वितीयोऽङ्कः

[xvi] अभिज्ञानशाकुन्तलम् - 6.11

[xvii] मालविकाग्निमित्रम् - तृतीयोऽङ्कः

[xviii] गीता- 3.4

[xix] अभिज्ञानशाकुन्तलम् - 2.10

[xx] अभिज्ञानशाकुन्तलम् -1.16

[xxi] अभिज्ञानशाकुन्तलम् - षष्ठाङ्कः

[xxii] विक्रमोर्वशीयम् -चतुर्थाङ्कः

[xxiii] अभिज्ञानशाकुन्तलम् - प्रथमाङ्कः

[xxiv] कठोपनिषद्- 1.2.24

[xxv] अभिज्ञानशाकुन्तलम् -4 पृ-249

[xxvi] अभिज्ञानशाकुन्तलम् - 1.10

[xxvii] अभिज्ञानशाकुन्तलम् -7.12